कक्षा - नवम
विषय - संस्कृतम्

(1) अधोलिखितम् गद्यांशम् पठित्वा प्रश्नानाम् उत्तराणि लिखत,

पर्यावरणस्य प्रदूषणम् आधुनिकस्य युगस्य ज्वलन्ती समस्या अस्ति। उद्योगानां विकासेन मानवस्य सुखसौविध्यानां विकासः सञ्जातः परं पर्यावरणस्य महती क्षतिः जाता। उद्योगानां अवकरः, मलिनानि रसायनानि, वाहनानां धूमः मानवानां कोलाहलः च वातावरणं निरन्तरं मलिनं कुर्वन्ति। अधुना हिमालये अपि निर्मलं जलं नैव लब्धुं शक्यते। शुद्धः वायुः अपि नगरेभ्यः दूरं एव लभ्यते। वृक्षाणां विनाशः खनिकर्मस्य च आधिक्यम् प्रदूषणस्य अन्यत् प्रमुखं कारणम्। प्रदूषणेन एव वायुमण्डले उष्णता वर्धते, जलं शुष्यति, हिमशिखराः नश्यन्ति, सागरः वर्धते पृथ्वी च जलमग्ना भवति। अतः अस्माभिः मानवतायाः रक्षार्थं पर्यावरणस्य रक्षा करणीया।

(क) आधुनिकस्य युगस्य ज्वलन्ती समस्या का ?
(ख) निर्मलं जलं कुत्र न लब्धुं शक्यते ?
(ग) वातावरणम् के के दूषयन्ति ?
(घ) वायुमण्डले का वर्धते ?
(ङ) प्रस्तुत गद्यांशस्य उचितं शीर्षकम् लिखत ।

(2) 'स्वास्थ्यम्' एवं 'ग्रामजीवनम्' इति विषये पञ्च वाक्यानि लिखत ।

P.T.O. →

(ख) वाक्य निम

(3) प्रश्नवाचकं वाक्य निर्माणम् कुरुत –

(क) अधुना वयम् संस्कृतम् पठामः।
(ख) बालकाः उद्याने भ्रमन्ति।
(ग) सरोवरे स्वच्छम् जले मीनाः तरन्ति।
(घ) इवः सुयम् जन्तुशालाम् गच्छथः।
(ङ) ग्रीष्मकाले सूर्यस्य प्रकाशः तीव्रः भवति।

(4) संख्या स्थाने शब्द (पद) प्रयोगं कुरुत।

(क) नवमं वर्गे 35 छात्र छात्राणि पठन्ति।
(ख) एकस्मिन् पक्षे 15 दिवसा भवन्ति।
(ग) फरवरी मासे 29 दिवसा भवन्ति।
(घ) मम संस्कृत विषयस्य पुस्तके 17 पाठः अस्ति।
(ङ) वृक्षे 19 खगाः तिष्ठन्ति।

(5) सन्धि विच्छेदम् कुरुत –

हर्षोउल्लासः, यथोचितम्, परोपकारः,

वसन्तोत्सवः, सज्जनः, गणेशः।

(6) संख्यावाचीं स्थाने पद-प्रयोगं कुरुत -

(क) प्रातः 7:30 वादने विद्यालयम् गच्छामः

(ख) अहम् 5:00 वादने गृहकार्यं करोमि

(ग) अहम् संध्याकाले 4:30 वादने क्रीडामि।

(घ) तौ 2:15 वादने भोजनम् खादतः।

(ङ) सूर्यः 5:45 वादने कुत्र गच्छति ?

(7) पर्यायवाची पदानि लिखत — ([illegible])

चिरम् ______ ।

अध्यापकः ______ ।

नूतनम् ______ ।

उद्यम् ______ ।

पंकजः

(8) संस्कृत भाषायाम् अनुवादं कुरुत -

(क) संस्कृत हमारी प्राचीन भाषा है।

(ख) कालिदास महान् कवि था।

(ग) रामायण, महाभारत और गीता पवित्र ग्रन्थ हैं।

(घ) वह मेरा सच्चा मित्र है।

(ङ) हम सब भारतीय हैं।

(9) धातु और प्रत्यय अलग अलग करके लिखें

~~पठितुम् लिखितुम्~~

"पठितुम् , गन्तुम्, आगम्य, अधीत्य, आगत्य"

(10) नम् धातु रूपाणि लोट् लकारे लिखत